५६-८, शब्दार्थ सार संग्रह

२०-११-५२ पु. सं. ८

(३)

॥ श्री गणेशाय नमः ॥ प्रभु

विनयात्वां स्तुवे वी

विनितत्रिदशेश्वरं

...धल्लनिष्काम

प्रकाशितमहागमः

भावनत्वनिधिं देवमा

लमत्राद्भुतं तव २

वंदेऽहं नवरत्नस्वधीनसारत्नासनं

रमनकल्याणशोकमानमं वर्णमि

पापतिमिरतयकारत्काय मस्येतराम

लनपः कवेलापल्लोचनम् २

ॐ गणपतये नमः विशेष्यविशेषणभावो द्विविधः भेदान्वयोऽभेदान्वयश्च तत्रोभयत्र धर्मिणोः पार्थक्यं परस्परयोगा
ईस्वातंत्र्येण क्रियाद्यन्वययोग्यं विशेष्यम् इतरद्विशेषणम् भेदान्वये हि ब्राह्मणस्य धनं ग्रामं गच्छतीत्यादौ
प्रायः षष्ठ्याद्यर्थप्रकारकः एवं द्वितीयत्वविरुद्धविभक्त्यनवरुद्धपदबोध्यः सामानाधिकरण्यरूपः तत्र त्वतला
दिभावप्रत्ययगम्यो धर्मो विशेषणम् तच्च विकल्पोपाधिगुणादिशब्दितम् तत्र तात्पर्येण विवक्षानुसार
णः अवच्छेदकं विधेयं प्रकारश्चेति त्रिविधो [illegible] त्वादिप्रयोगेन धर्मिणो षष्ठी [illegible] नत्वत्र
बुद्धप्रयत्नाभिः यथा ब्राह्मणस्य ब्राह्मणेनागतत्वम् पर्वतस्य पर्वते वा धूमवत्त्वाद्वह्निमत्वम् इत्यत्रयः
ब्राह्मणत्ववान् स आगतः पर्वतो धूमवान् स वह्निमानिति सामानाधिकरण्येनान्वयः स्य परिच्छापकं
तत्त्वस्यावच्छेदकम् व्याप्तेर्व्यवहारस्य चापादकं परिच्छापकं जातिसंज्ञागुणक्रियाद्व्यादिरूपमवच्छेद
कं यथा कस्यागतस्य पादाद्यागमनानुकूलव्यापारः षच्छे चैत्रो ब्राह्मणो या पाण्डित्यो वा गौरो वा पाचको
वा दण्डी वेत्यादिबोध्यम् तथा च ब्राह्मणत्वावच्छिन्नागमनानुकूलकृतिमानित्यादिबोधः यत्र नादा
त्म्येन पटादित्वत्र समवायेन पटत्वादिकमिति सामानाधिकरण्यात्पटत्वोर्धः पटादिव्यवत्त्यवच्छे
दकत्वम् देशाद्यवच्छेदेन निष्ठगमनादिसाध्य विधाय मेवं रूपस्यान नातिप्रसंगसाद्य प्रयत्नकृति
श्चानुच्यते तत्र जातिसंज्ञोनुनपुंसकपदार्थनियतत्वेव्यावच्छेदके यथा घटादिपदार्थे पटादिव्यावृत्ते
घटादिपदशक्यतायाः कपालादिकार्यनादिसर्वव्यवहाराणां चावच्छेदकं घटत्वादिजातिरेव

देवदत्तादौ च संज्ञेचत्वादिबोध्या: अनपद्यतयो: प्रायो विशेष्यताव्छेदकत्वं अवहरंति अतएतानि संज्ञा शब्द
योरेवशुक्लपटादिवकुब्रीहिकर्मधारयये: परनिपातप्रयोजकं विशेष्य शब्दत्वं व्यवहरंति इदानीं घटोत्पत्ती
त्यादावपृत्तिकानामपि विभूनां कालादीनां विशेष्यतया सामानाधिकरण्येन सत्ता अवच्छेदकत्व
प्रसिद्धं विशेष्यमुद्दिश्य प्रसिद्धं बाधनीयं तत्र योग्यतां विधेयमित्युच्यते विशेष्यधर्मितदेवविधेयवि
शेषणान्येवतथानुपायमुद्देश्यतोच्यते पूर्वप्रयोगप्रवृत्तेन देवेन विधेयम् यथा पर्वतो वह्निमानित्या छे
त्र आगत इत्यादौ पूर्वप्रयोगानुविशेष्यमात्रान्वयेनात्मा त्यनतया वह्निमत्वादेस्तात्तत्वान्न विधेय
त्वमुपेक्षितं तत्वं च प्रतियोगित्वं निरूपकत्वं चेतिनाथीन्तरम् तथा च निरूपसापेक्षाणां पुत्रत्वपितृत्वा
दीनां निरूपणाधीनात्मप्रत्ययेन निरूपके: सह निरूप्यनिरूपकभाव: सप्रतियोगी निरूप्यपद
निरूप्यधर्माधिकरणमनुयोगि तथा च निरूप्यधर्मो द्वारानुयोगप्रतियोगिभावसंबंधोऽपेक्षो
प: तत्रित: देवदत्तस्य पुत्र इत्यत्र देवदत्तपुत्रत्वेन इत: क्रमेण प्रतियोगि सप्रतियोगिकं तथा गिनोभ
वंति तत्र दत्तस्य पिता इत्यत्र तत्तु पत्र दत्तपितृत्वेन दास्य या सत्या बोध्या: एवमेव तत्स्यावच्छेदकत्वेनाव
छेद्य इत्यादावपि अवच्छेदकत्वावच्छेद्यत्वजन्यत्वजनकत्वव्याप्यत्वव्यापकत्वाधारत्वाधेयत्वपूर्वत्वपरत्वा
दीनि निरूपणीयेष्वनुयोगिप्रतियोगिनोस्वयमूह्यो यथा पूर्वप्रेयत्वसान्यत्वानिष्ठावच्छेदकतानिरूपि

२ ता: वह्नेर्यत्ताशालिगमननिष्ठजन्यतानिरूपितजनकताशालिकृतिनिरूपिताधिकरणतावाल्लीपुरुषइति बोधः
पर्वतो वह्निमानित्यत्र वह्नौ विधेयपर्वतत्वमुद्देश्यता: वच्छेदकम् प्रत्यक्षादिना वह्नौ ज्ञाते अनु पर्वतत्वं विशेष्य
तावच्छेदकं तथा च क्रमेण पर्वतत्वनिष्ठावच्छेदकतानिरूपितावह्नेर्यत्ताशाल्युद्देश्यतानिरूपितवह्निनिष्ठ
विधेयताको बोधः पर्वतत्वावच्छिन्नविशेष्यतानिरूपितानिरूपितवह्निनिष्ठप्रकारताको बोधः तथा प्रस्तु
ता तावच्छिन्नोद्देश्यतानिरूपितानिरूपितत्वनिष्ठविधेयताको बोधः एवं इत्यत्रागच्छतीत्यादावपि बोध्यम् अनुमाने
नुपपत्तेर्वधर्मिता यत्र यदविनाभूतं तेन व्याप्यं द्वितीयं व्यापकम् व्याप्यसमवधानं पूर्वं व्यापकस्य तत:
परम् अभावयोस्तद्विरुद्धं व्याप्यव्यापकतामता व्याप्यत्वं व्याप्तिरिति तार्थान्तरम् यथा वह्निनिरूपित
व्याप्यत्वं धूमे धूमनिरूपितव्यापकत्वं वह्नौ तथा वह्न्यभावनिरूपितव्यापकत्वं धूमाभावे धूमाभावनि
रूपितव्याप्यत्वं वह्न्यभावे इति अन्वयव्यतिरेकौ ह्यविमौ दृष्टान्तलाभत: तौ सपक्षविपक्षाख्यौ स्फुट
साध्यतदन्ययोरिति व्याप्तिस्तु नियतधूमस्य वाच्यैव अत्र वह्न्यभावस्तत्र धूमाभाव: ननु यत्राग्निस्तत्र
धूम इत्याद्विबोध: अनुमानवत्सर्वत्रनु दृष्टविधेयभावो बोध्य: आधारत्वमधिकरणत्वम् आधेयत्व
तद्वृत्तित्वम् अभावसंबंधादीनां तु सप्रतियोगित्वमेव न प्रतियोगित्वम् घटादीनां तु निष्प्रतियोगि
नैव जातिवाचिकत्वात् विशेषणविभक्ति: प्रयोगसाधुत्वाय प्रथमाविभक्तिस्तु संख्यामात्रमर्थ: २

स्य

ब्राह्मणस्य धनमित्यादौ षष्ठ्याः स्वत्वाद्यनेकविधः उभयपदार्थसंबंधो वाच्यः तथा च ब्राह्मणत्वावच्छिन्ननिरू
पितस्वत्ववच्छालि धनमिति बोधः द्वितीयायाः कर्मत्वम् तच्च संयोगविभागादिरूपक्रियाजन्यफलमे
व क्रिया च धात्वर्थरूपा कर्माख्याततृतीयावाच्यकृतिजन्यो व्यापार एव कर्माख्यातस्य तु प्रागुक्तफल
मेव न कृतिः आख्यातार्थस्य कालस्य कृतावेवान्वयः अयमत्र संग्रहः व्यापारो धातुना वाच्यस्तस्य
लेन द्वितीययोः कृतिस्तृतीयाख्यातयोर्भाजनकत्वादिरन्वयात् १ इत्यादौ कृतेर्बोधे व्यापार
रूपफलत्वेन तिङर्थसंख्ययोर्न्वीनः प्रथमान्तो विशिष्यते संख्यायास्तु कृतिफलाश्रयरूपयोः क
र्तृकर्मणोरेवान्वयः जन्यत्वाश्रयत्वादिकं न कस्यापि वाच्यम् किंतु निरूपितत्वादिवत्संसर्ग
वल्लभ्यमेव प्रथमान्तकर्तृकर्मणोरेवानुविशेष्यत्वम् नतु अन्ययोर्विशेष्यत्वबोधार्थकमाख्याते
नुकूलव्यापारजनककर्माख्यातेचेत्यपरपूर्वोक्तं सिद्धम् तथा च ग्रामं गच्छति देवदत्त इत्यत्र
कर्त्र्येकग्रामनिष्ठसंयोगानुकूलवर्तमानकृतिमान् देवदत्त इति बोधः गम्यते ग्रामो देवदत्तेनेत्य
त्र कर्माख्याते तु एकदेवदत्तनिष्ठवर्तमानकृतिजन्यव्यापारजन्यसंयोगाश्रयत्वैकग्राम इति बोधः वर्तमा
नत्वं प्रारब्धापरिसमाप्तत्वम् लिङ्गस्य भूतत्वं च वर्तमानध्वंसप्रतियोग्युत्पत्तिकत्वम् [illegible]

३ कृत्स्नुकर्त्रोच्चार्यार्थाभिधायकत्वंतत्तद्विशेष्यकोबोधोनाख्यातवत्संख्यायाःप्रथमन्तार्थोपमपेक्षते देवदत्तेनस्थीयत
इत्यत्रभावाख्यातेनुफलादरभावान्व्यापरपर्येनएवबोधः कृतिसाध्यत्वेतिप्रधत्वंवदातृज्ञानजनकेसा
धनत्वंविधेयः स्वर्गकामोयजेतेत्यादौतादृशयागकः स्वर्गकामइतिबोधः [illegible]
ख्यापेणालिङ्लोटोर्वेङ्क्त्वाविषयत्वमर्थः गत्यादिस्थादौभादिक्त्वादिविषयगमनानुकूलत्वं तिमा
नितिबोधः अधिकरणत्वंतुकर्तृकर्मद्वाराव्यापारफलाश्रयत्वम् संप्रदानत्वंतुउद्देश्यत्वम् अपे
यत्वमितियावत् अपादानत्वंतुविभागजनकक्रियानाश्रयत्वेसतितद्विश्लेषाश्रयत्वम् करणा
त्वंतुकर्त्रधिष्ठितत्वेसतिक्रियाजनकव्यापारवत्वम् कर्तृकर्मकरणसंप्रदानतथैवच अपादाना
धिकरणमित्याहुः कारकाणिषडिति कृचैत्रोगेहत्री प्रथमयोर्विभक्त्योःप्रयुक्तत्वम् रागः पु
रुषइत्यादिसंबंधषष्ठ्यास्तुनकथंचित्कारकपरत्वम् क्रियान्वयित्वएवकारकत्वात् सचग्राम
कर्मगमनकर्त्ता देवदत्तकर्तृकगमनकर्मेत्येवंबोधः तथाहिअधिकरणकत्वहेतुकेत्यादिबो
धः तत्संप्रदानकत्वंनामविप्रादिनिष्ठोद्देश्यतानिरूपितगवादिद्रव्यनिष्ठत्वं वा दकत्वम् तदपा
दानकत्वंनामतन्निष्ठविभागजनकत्वम् तत्करणकत्वंनामतन्निष्ठव्यापारजन्यत्वम्॥ ३

यत्नुव्यापारमात्रस्य धात्वर्थत्वात्ग्रामं त्यजति ग्रामं गच्छतीत्यादौ कर्मत्वापत्तिः विभागं च फलव्यापारयोरपि फलं कर्तृत्वा
द्वितीयापत्तेर्वारणाय फलधात्वर्थतावच्छेदकत्वम् संयोगविभागयोर्द्वित्वस्थत्वेन कर्तृरपि कर्मतापत्तिर्वारणा
य फलजनकक्रियायां परसमवेतत्वं च निरूढ द्वितीयायाः आश्रितत्वं रात्रयामः प्रकारतादिविषयतानाम
वच्छेदकानां च धिकापत्तेः स्वकारणस्य कपालत्वात् कारणतावच्छेदकत्वं च कार्यत्वं अथ त्वादि
रूपाकाशत्वादेरव्याप्यस्यापि वाच्यतावच्छेदकत्वस्वीकारात् स्थाने व्याप्यविषयताव विशेष्यता प्रकार
तासांसर्गिकीत्येति नत्वादि प्रयोगकारमनीतिसिद्धस्वरूपसंबंधरूपान्येव अनवच्छिन्नस्याः प्रतियोगित्वविषय
साधारणरूपमेव स्वं गस्त्वरूपसंबंधप्रतीतेरविशेषात् नीलो घट इत्यत्र नीलाभिन्नो घट इति शाब्दबोधे नीलत्वं
जात्यवच्छिन्ननीलगुणनिष्ठप्रकारतानिरूपित समवायत्वसांसर्गिकविषयतावच्छिन्ना विशेष्यता घ
त्वनिरूपिताभेदरूपसांसर्गिकविषयतानिरूपितघटत्वावच्छिन्नविशेष्यताशालीतिविषयतावोधः नील
गुणवृत्तिजातिनीलत्वजातिनिष्ठावच्छेदकतानिरूपिता समवायात्मकेति चेवंयां सर्वत्र वाच्यम् आश्रयतानि
रूपितस्वत्वप्रतियोगिताशाब्दबोधे आश्रयत्वावच्छिन्नाश्रयतानिष्ठप्रकारताविषयतानिरूपितनि
तत्वरूपभेदसांसर्गिकविषयतावच्छिन्नविशेष्यताशालीतिविषयतावोधः एकग्रामनिष्ठसंयोगानुकूल
गमनानुकूलयत्नमानहस्तमानितिशाब्दबोधे एकत्वावच्छिन्नैकत्वनिष्ठप्रकारतानिरूपितसमवायात्मा
सांसर्गिकविषयतावच्छिन्नफलत्वावच्छिन्नविशेष्यताभिन्नग्रामनिष्ठप्रकारताविषयतानिरूपिताश्रित
त्वरूपभेदसांसर्गिकविषयतावच्छिन्नफलत्वावच्छिन्नविशेष्यताभिन्नसंयोगनिष्ठप्रकारतानिरूपि

नजनकतात्मकभेदसांसर्गिकविषयतावच्छिन्नगमनत्वावच्छिन्नविशेष्यताविषयताभिन्नगमनत्वनिष्ठप्रकारता
विषयतानिरूपितानुकूलतात्मकभेदसांसर्गिकविषयतावच्छिन्नवर्तमानकालत्वावच्छिन्नप्रकारतानि
रूपिताधेयतात्मकभेदसांसर्गिकविषयतावच्छिन्नकृतित्वावच्छिन्नविशेष्यताभिन्नकृतिनिष्ठप्रका
रतानिरूपिताश्रयत्वात्मकभेदसंसर्गावच्छिन्नैकत्वनिष्ठप्रकारतानिरूपितसमवायावच्छिन्नदेवद
त्तत्वाद्यनन्तमावच्छिन्नविशेष्यताशालीति बोधः देवदत्तेन गम्यते ग्राम इत्यत्र एकत्वावच्छिन्नैकत्वनिष्ठ
प्रकारतानिरूपितसमवायात्मकसांसर्गिकविषयतावच्छिन्नदेवदत्तत्वावच्छिन्नविशेष्यताभिन्न
प्रकारतानिरूपिताश्रितत्वरूपभेदसांसर्गिकविषयतावच्छिन्नवर्तमानकालत्वावच्छिन्नप्रकारतानि
रूपिताधेयतात्मकभेदसांसर्गिकविषयतावच्छिन्नकृतित्वावच्छिन्नविशेष्यताभिन्नप्रकारतानि
रूपितजन्यत्वात्मकसांसर्गिकविषयतावच्छिन्नगमनत्वावच्छिन्नविशेष्यतेत्यादि पूर्ववत्याख्ये
नसर्वं स्वयमेवोहनीयम् प्राचां शास्त्रे तु कृति धात्वर्थान्तर्भूतैव धात्वर्थविशेषणकृ एव च बोधः एकग्रा
मकर्मकमेव देवदत्तकर्तृकं गमनमित्येवं सर्वत्रोहनीयम् इति शब्दार्थसारमंजूषा गमनत्वाव
च्छिन्नविशेष्यताभिन्नप्रकारतानिरूपितजन्यत्वात्मकभेदसंसर्गावच्छिन्नसंयोगत्वावच्छिन्नवि
शेष्यताभिन्नप्रकारतानिरूपिताश्रयत्वात्मकभेदसांसर्गिकविषयतावच्छिन्नविशेष्यताशाली
ति॥ = ॥